इति च भा॰आ॰प॰१४४ अध्या॰। २२ अग्न्युद्दीपन साधने घृते २३अस्त्रविशेषे च न॰। तत्र आगतः ढक्। अग्निप्रकृतिके २४कीटभेदे ते च चतुर्विंशतिविधाः यथाह सुश्रुतः। "कौण्डिल्यकः कणभको वरटी पत्रवृश्चिकः। विनासिका ब्रह्मणिका बिन्दुलो भ्रमरस्तथा। बाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः। पद्मकीटो दुन्दुभिश्च मकरः शतपादकः। पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी। क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः। एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च। तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः"। "अग्नायी देवताऽस्य ढक् पुंवद्भावः। २५स्वाहादेवताके स्थालीपाके। [अग्न्याधानदक्षिणायाम्।

**आग्न्याधानिकी** स्त्री अग्न्याधानस्य यज्ञस्य दक्षिणा ठञ्।

**आग्रभोजनिक** पु॰ अग्रभोजनं नियतं दीयतेऽस्मै ठञ्। नियतम् अग्रभोजनदानसम्प्रदाने विप्रभेदे। (अग्रदानी)।

**आग्रयण** त्रि॰ अग्रे अयणं भोजनं शस्यादेर्येन कर्म्मणा पृ॰ ह्रस्वदीर्घः व्यत्ययः। नवान्नागमनिमित्ते साग्निककर्त्तव्ये यज्ञभेदे तत्प्रकारः आश्वलायनश्रौतसूत्रे दर्शितो यथा "आग्रयणं व्रीहिश्यामाकयवानाम्१। शस्यं नाश्नीयादग्निहोत्रमहुत्वा२। यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत३। अपि हि देवा आहुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजत इति अग्निहोत्रीं वै नानादयित्वा तस्याः पयसा जुहुयात्४। अपि वा क्रिया यवेषु५। इष्टिस्तु राज्ञः६। सर्वेषां चैके७। श्यामाकेष्ट्यां सौम्यश्चरुः८। सोम! यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यामित्यवान्तरेडाया नित्यं जपमुक्त्वा सव्ये पाणौ कृत्वेतरेणाभिमृशेत् प्रजापतये त्वा ग्रहं गृह्णामि मह्यं श्रिये मह्यं यशसे मह्यमन्नाद्यायं९। भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितवाविशेह शन्नो भव द्विपदे शं चतुष्पद इति प्राश्याचम्य नाभिमालभेतामोऽसि प्राण! तदृतं ब्रवीम्यमासि सर्व्वानसि प्रविष्टः। स मे जरां रोगमपनुद्य शरीरादमा म एधि मामृधाम इन्द्रेति१०। एतेन भक्षिणो भक्षान् सर्वत्र नवभोजने११। अथ व्रीहियवानां धाय्ये विराजौ१२। अग्नीन्द्राविन्द्राग्नी वा विश्वे देवाः सोमो यदि तत्र श्यामाको द्यावापृथिवी१३। आद्या ये अग्निमिन्धते सुकर्माणः सुरुचो देवयन्तो विश्वे देवास आगत ये के च ज्मामहि नो अहिमाया मही द्यौः पृथिवी च नःप्रपूर्वजे पितरानव्यसीभिरिति१४।

"अग्रे अयनं भक्षणं येन कर्म्मणा तदाग्रयणम्। प्रथमद्वितीययोर्ह्रस्वदीर्घत्वव्यत्ययः। एषान्त्रयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानाम् आग्रयणं नाम कर्म कर्त्तव्यमित्यर्थः। व्रीहिशब्दस्य प्रथमनिपातो व्रीहीणां प्राधान्यख्यापनार्थम्। तेन कालचोदना व्रीह्याग्रयणस्यैव भवति। श्यामाकशब्दस्य मध्यनिपातो व्रीहिकालाद्-यवकालो भिन्न इति ज्ञापयति१। शस्यं नवनिष्पन्नं, तन्नाश्नीयात् आग्रयणेनानिष्ट्वा। यद्याग्रयणेनानिष्टवतो नवनिष्पन्नेनाशनेन विना निर्व्वाहो न स्यात् तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायम्प्रातरग्निहोत्रं हुत्वाऽश्नीयात्। ततः काल आगते त्वाग्रयणं कुर्य्यात्। अग्निहोत्रमहुत्वा नाश्नीयादितिवचनादाग्रयणेनानिष्ट्वाप्यग्निहोत्रं हुत्वाऽश्नतो न दोष इति गम्यते। शस्यग्रहणं व्रीह्याद्यन्यदपि यन्निष्पन्नं तस्य सर्वस्य प्रतिषेधार्थम्२। यदा वर्षेत्तृप्तिर्लोकस्य भवति तदाग्रयणेन यजेत। अनेन प्रकारेण व्रीह्याग्रयणस्य शरत्काल उक्तो भवति। एतमेव कालं श्रुत्या समर्थयति३। अथाग्रयणेन यजेतेति इष्टिरेवाग्रयणशब्देनोक्ता, इदानीमिदमप्युच्यते। अग्निहोत्रहोमार्था धेनुरग्निहोत्रीत्युच्यते। तां व्रीहिश्यामाकयवानामन्यतमम् आशयित्वा तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात्। इष्टिः प्रथमकल्पः, तदसम्भवेऽयमनुकल्पः इति द्वावेवाग्रयणकल्पावत्रोच्येते४। यवैराग्रयणस्य क्रिया भवेत् अक्रिया वेति विकल्पः५। त्रयाणां वर्णानामविशेषेण कल्पद्वये प्राप्ते राज्ञो विशेष उच्यते इष्टिरेव नान्य इति६। सर्वेषामपि वर्णानामिष्टिरेवेत्येके मन्यन्ते७। श्यामाकाग्रयणे इष्ट्यां सोमदैवत्यश्चरुर्भवति। कालो वर्षा ऋतुः, शास्त्रान्तरे दर्शनात्८। इतिकाराध्याहारेण सूत्रच्छेदः। नित्यजपशब्देनेडे भागमिति मन्त्र उच्यते। तस्य नित्यत्वे सत्यपि नित्यवचनम् एतेन भक्षिण इति विध्यतिदेशे तद्वर्ज्जितस्य प्रापणार्थम्९। स्मृतिप्राप्तस्याचमनस्य विधानं यस्मिन् देशे आचमनं कृतं तस्मिन्नेव देशे स्थितस्य च नाभ्यालम्भनसिद्ध्यर्थम्१०। एतेन विधानेन सर्वभक्षेषु सर्वे भक्षिणः सर्वान् भक्षान् भक्षयेयुः। सर्वत्रवचनं प्रकरणोत्कर्षार्थम्। नवभोजनवचनं लौकिकेऽपि नवभोजने प्रापणार्थम्। सर्वत्रवचनात् प्रकरणादुत्कृष्टमपि नवभोजनवचनाल्लौकिक एव व्यवतिष्ठते। वैदिकेऽग्निहोत्रहोमे 'नावानां सवनीयान्, इत्यत्र न प्राप्नुयात्, तत्रापि प्रापणार्थं भक्षणवचनम्११। अथानन्तरं व्रीहीणां यवानां चाग्रयणेष्टिरु-